सचायं गन्धः द्विविधः सुरभिरसुरभिश्च। भा० आश्व० ५०अ० अस्य दशविधतोक्ता यथा। शब्दः स्पर्शस्तथा रूपं रसो गन्धश्च पञ्चमः। एते पञ्च-गुणा भूमेर्विज्ञेया द्विजसत्तमाः!। पार्थिवश्च सदा गन्धो गन्धश्च बहुधा स्मृतः। तस्य गन्धस्य वक्ष्यामि विस्तरेण बहून् गुणान् (भेदान्)। इष्टश्चानिष्टगन्धश्च मधुरोऽम्लः कटुस्तथा। निर्हारी संहतः स्निग्धो रूक्षो विशद एव च। एवं दशविधो ज्ञेयः पार्थिवो गन्ध इत्युत"। तत्रेष्टः १कस्तूरिकादौ, अनिष्टः २विष्ठादौ, मधुरः ३मधु-पुष्पादौ, कटुः ४मरिचादौ, निर्हारी ५हिङ्ग्वादौ। संहतश्चित्रगन्धः ६अनेककल्कद्रव्यादौ, स्निग्धः ७सद्य-स्तप्तघृतादौ। रूक्षः ८सार्षपतैलादौ। विशदः ९शाल्यादौ, अम्लः १०तिन्तिडच्यादौ। तस्योत्कटानुत्कटत्वादिकः अवान्तरधर्म्मः उद्भूतशब्दे ११८१ पृ० विवृतः।

तत्र सुरभिगन्धः पञ्चविधः पूजाङ्गम् यथाह कालि०पु०। "गन्धञ्च सम्यक् शृणुतं पुत्रौ! वेतालभैरवौ!। चूर्णीकृतो १वा घृष्टो २वा दाहकर्षित ३एव वा। रसः सम्मर्दजो ४वापि प्राण्यङ्गोद्भव ५एव वा। गन्धः पञ्चविधः प्रोक्तो देवानां प्रीतिदायकः। गन्ध-चूर्णं गन्धपत्रचूर्णं सुमनसां तथा। प्रशस्त-गन्धयुक्तानां पत्रचूर्णानि यानि च। तानि गन्धाह्वा-यानि स्युः स गन्धः प्रथमः १स्मृतः। घृष्टो मल-यजो गन्धः सरलस्य नमेरुणा। अगरुप्रभृतिश्चापि यस्य पङ्कः प्रदीयते। घृष्टा, स घृष्टो गन्धोऽयं द्वितीयः परिकीर्त्तितः २। देवदार्वगुरुब्रह्मसालसारान्तचन्दनाः। प्रियादीनाञ्च यो दग्ध्वा गृह्यते दाहजो रसः। स दाहा कर्षितो गन्धस्तृतीयः परिकीर्त्तितः३। स गन्धः करवी-विल्वगन्धिनीतिलकं तथा। प्रभृतीनां रसो योऽसौ निष्पीड्य परिगृह्यते। स सम्मर्दोद्गतो गन्धः सम्मर्द्दज इतीर्य्यते ४। मृगनाभिसमुद्भूतस्तत्कोषोद्भव एव वा। गन्धः प्राण्यङ्गजः प्रोक्तो मोददः स्वर्गवासिनाम् ५। कर्पूरगन्धसाराद्याः चोद्दे घृष्टे च संस्थिताः। चन्द्रभा-गादयश्चापि रसे पङ्के च सङ्गताः। गन्धसारस्तु सर्वत्र ससर्गादौ प्रयुज्यते। मृगनाभिर्भवेद्दृष्टस्पूर्णोऽप्यन्यस्य योगतः। एवं सर्वैस्तु सर्वत्र गन्धो भवति पञ्चधा। दृष्टादिभावादन्योन्यं गन्धः प्रीतिकरः परः। गन्धस्य विस्तरो भेदः प्रोक्तः कालीयकादयः। सर्वः पञ्चविधे-ष्वेव प्रविष्टो भवति क्षणात्। गन्धो मलयजो यस्तु दैवे पैत्रे च सम्मतः। तत्पङ्को वा रसो वापि चूर्णो वा विष्णुतुष्टिदः। सर्वेषु गन्धजातेषु प्रशस्तो मलयोद्भवः। तस्मात् सर्वप्रयत्नेन दद्यान्मलयजं सदा। कृष्णागुरुः सकर्पूरः सहितो मलयोद्भवैः। वैष्णवप्रीतिदो गन्धः कामाख्यायाश्च भैरवौ!। कुङ्कुमागुरुकस्तूरीचन्द्रभागैः समीकृतैः। त्रिपुराप्रीतिदो गन्धस्तथा चण्ड्याश्च श-म्भुना। दैवतोद्देशपूर्वेण गन्धान् सम्पूज्य साधकः। देवायेज्याय वितरेत् सर्वसाध्येषु पूजकः। गन्धेन ल-भते कामं गन्धो धर्म्मप्रदः सदा। अर्थानां साधको गन्धो गन्धे मोक्षः प्रतिष्ठितः। अयं वै कथितो गन्धः पुत्रौ वेतालभैरवौ" कालि० पु० ६८अ०।

३कृष्णागुरुणि न० शब्दार्थचि० "नवपरिमलगन्धः केन शक्योवरीतुम्" सा०द०। "गन्धवद्रुधिरचन्दनोक्षिता" रघुः। "वर्ज्जयेन्मधुमांसं च गन्धं माल्यं रसान् स्त्रियः" मनुः। ४गन्धवति त्रि०। उद्+पूति+सु+सुरभि+शब्दात् परस्य गन्धस्य बहु० टच् समा०। उत्कटो गन्धोऽस्य उद्गन्धिः एवं पूतिगन्धिः सुगन्धिः सुरभिगन्धिः। "गन्धस्येत्त्वे तदेकान्तग्रहणम्"वार्त्ति० "एकान्त एकदेश इवाविभागेन लक्ष्यमाण इत्यर्थः यथा सुगन्धि पुष्पम् सलिलं वा सुगन्धिर्वायुरिति"च सि०कौ०। अत्र औपाधिकगन्धवत्त्वात् तथात्वम् शोभना गन्धा गन्धयुक्ताः पदार्थाः सन्त्यस्य सुगन्ध आपण इत्यादौ न" सि०कौ०। "कण्डूयतः कट-भुवं करिणो मदेन स्कन्धं सुगन्धिमनुलीनवता नगस्य" "सुगन्धितामप्रतियत्नपूर्वाम्" माघः। "आघायि वान् गन्धवहः सुगन्धस्तेनारविन्दव्यतिषङ्गवांश्च"भट्टिः। "अर-विन्दव्यतिषङ्गवत्त्वात् गन्धस्येत्त्वं न भवति विभागेन लक्ष्यत्वादिति जयम०। एवं उपमानपूर्वकस्य तस्येत् समा० पद्मगन्धिः। "प्रस्थं हिमाद्रेर्मृगनाभिगन्धि" कुमा० लेशवाचकत्वेऽपि इत् समा०। "सूपगन्धि घृतगन्धि भोजनम्" सि० कौ०। देवादौ गन्धदानेऽङ्गुलिविशेष-नियमः तन्त्रसारे उक्तो यथा "मध्यमानामिकाङ्गुष्ठैर-ङ्गुल्यग्रेण पार्वति!। दद्याच्च विमलं गन्धं मूलमन्त्रेण साधकः"। तत्र देयगन्धस्तु चन्दनकर्पूरकालागुर्वात्मकः यथाह तन्त्रसा० निबन्धे "गन्धश्चन्दनकर्पूरकालागुरु-भिरीरितः" तद्योजनप्रकारो गन्धयुक्तिशब्दे दृश्यः।

**गन्धक** पु०गन्धोऽस्त्यस्य अर्श० अच् स्वार्थे क। १शिग्रुवृक्षे (सजना) शब्दर०। २स्वनामख्याते उपधातुभेदे तस्यो-त्पत्तिगुणभेदशोधनादिकं भावप्र० उक्तं यथा